# E-Text

**पत्रस्य नाम** : लघुशब्देन्दुशेखरः (सन्धिपञ्चकम्)

**पत्रसंख्या** : **V**

**पाठ्यांशनाम** : स्थानिवदादेशोऽनल्विधौ - 1

**पाठ्यांशसंख्या** : 4

**पाठ्यांशस्य मुख्याः अंशाः :**

1) स्थानिवदादेशः – उपोद्घातः।
2) स्थानिवद्भाववचनावश्यकता।
3) अनल्विधौ – विग्रहः, निष्कृष्टार्थः, उदाहरणेषु समन्वयः, विचाराः।
4) शास्त्रीयकार्ये एव स्थानिवद्भावः।
5) शास्त्रातिदेशो वा कार्यातिदेशो वा।

**विषयसूची**


1.0 : स्थानिवदादेशः – उपोद्घातः
1.1 : स्थानिवद्भाववचनावश्यकता
2.0 : अनल्विधौ
2.1 : विग्रहः
2.2 : निष्कृष्टार्थः
2.3 : उदाहरणेषु समन्वयः
2.4 : विचाराः
3.0 : स्थानिवद्भावसम्बन्धिनः विशेषाः
3.1 : शास्त्रीयकार्ये एव स्थानिवद्भावः
3.2 : शास्त्रातिदेशो वा कार्यातिदेशो वा


Pathshala पाठशाला A Gateway to all Post Graduate Courses

1.0 स्थानिवदादेशः - उपोद्घातः

सुधी उपास्य इति स्थिते इको यणचि इति सूत्रेण यणादेशे सुध् य् उपास्य इति जाते धकारस्य अनचि च इति सूत्रेण द्वित्वं प्रसज्यते। तथाहि - तेन सूत्रेण (अचः परस्य यरः द्वे वा स्तः) इति विधाय (अचि परे न द्वित्वम्) इति निषेध उच्यते। (अचि परे द्वित्वं न) इत्युक्ते (हलि परे, अवसाने परे च द्वित्वं स्याद्) इति लभ्यते। प्रकृते (स् उ ध् य् उपास्य) इति स्थिते उकारात् परस्य धकारस्य यकारे परे द्वित्वं विकल्पेन प्रसज्यते। परन्तु स्थानिवदादेशः इति शास्त्रेस्मिन् आदेशस्य स्थानिवद्भावविधानात् इकारस्य स्थाने कृतः यकारादेशः इकारवत् प्रवर्तते। तथा च अचि परे विहितो द्वित्वनिषेधोऽत्र प्राप्नोति। तत्र स्थानिवद्भावनिषेध उच्यते अनल्विधौ इति। स्थानिवद्भावस्य तन्निषेधस्य च विस्तरेण अध्ययने कृते धकारस्य द्वित्वं भवति वा न वा इति ज्ञातुं शक्यते।

1.1 स्थानिवद्भाववचनावश्यकता

**शेखरे - स्थान्यादेशयोर्भेदात् स्वं रूपमित्युक्तेश्च तत्स्थानापन्नस्तद्धर्मं लभते यथा गुरोः स्थाने शिष्यो याज्यकुलानि गत्वा अग्रासनादीनि लभते इति लोकन्यायेन स्थानिकार्यमादेशे न स्यात् अतः स्थानिवत्सूत्रम्।**

स्थानिवत्सूत्रं किमर्थमारब्धमिति प्रश्नः। समाधानम् - स्थानी अन्यः, आदेशः अन्यः इति कृत्वा स्थानिनि उक्तं कार्यं स्थानिनि एव भवति, न तु आदेशस्य। परन्तु स्थानिनि उक्तं कार्यम् आदेशस्यापि इष्यते। तदर्थं सूत्रमारब्धम् - इति। ननु लोके तत्स्थानापन्नस्तद्धर्मं लभते, यथा गुरोः स्थाने शिष्यो याज्यकुलानि गत्वा अग्रासनादीनि लभते, एवं शास्त्रेऽपि आदेशो यस्य स्थाने कृतः तत्कार्याणि लभत एव - इति चेन्न। स्वं रूपं शब्दस्याशब्दसंज्ञा इति सूत्रसत्वात् स न्यायः शास्त्रे

आश्रयितुं न शक्यते। तत्सूत्रसत्वाद्धि यामानुपूर्वीमुच्चार्य शास्त्रे यत् कार्यं विहितं तस्यामानुपूर्व्यामेव तत् कार्यं भवति, न तु अन्यस्यामानुपूर्व्याम्। तस्मात् स्थानिकार्याणामादेशे सिद्धये स्थानिवत्सूत्रम् आरब्धम्। **उदाहरणम्** - आवधिषीष्ट। आङ्पूर्वकात् हनधातोः (आङो यमहनः) इति सूत्रेण आत्मनेपदं विहितम्। हनधातोः स्थाने लिङि (हनो वध लिङि) इति सूत्रेण वधादेशो विहितः। इदानीम् आङ्पूर्वकात् वधादेशात् परस्य लिङः स्थानिवदादेशः इति सूत्रानुसारेण आत्मनेपदं सिध्यति।

## 2.0 अनल्विधौ

**शेखरे - न तु स्थान्यलेति। प्रत्यासत्तिन्यायलब्धमिदम्।**

कौमुद्याम् अनल्विधौ इत्यस्य (न तु स्थान्यलाश्रयविधौ) इत्यर्थ उक्तः। स्थान्यलाश्रयविधौ कर्तव्ये आदेशः स्थानिवत् न स्यादिति तदर्थः।

## 2.1 विग्रहः

**अत्र प्रश्नः** - अनल्विधौ इति समस्तपदस्य न अल्विधौ इति विग्रहः। अल्विधिशब्दस्य च अलाश्रयः विधिः अल्विधिः इति विग्रहः। तत्र अलाश्रय इत्यंशस्य स्थान्यलाश्रय इत्यर्थकथने किं प्रमाणम्। -इति। समाधानम्- प्रत्यासत्तिन्यायेन अयमर्थो लब्धः। लक्ष्यानुरोधेन प्रत्यासत्तिन्याय आश्रीयते, न तु व्याप्तिन्यायः। यद्यपि स्थानिवद् आदेशः इति सूत्रस्थः पदक्रमः तथापि बोधक्रमानुरोधी पदक्रमस्तु आदेशः स्थानिवत् स्यात् इति भवति। उद्देश्यवचनं पूर्वं विधेयं तु ततः परम् -इति न्यायात्। तत्र अनल्विधौ इति निषेधे अल्पदश्रवणे आकाङ्क्षा जायते कस्य सम्बन्धी अल् इति, तत्र आदेशपदापेक्षया प्रत्यासन्नं पदं स्थानिपदं भवति। प्रत्यासन्नमित्यस्य समीपस्थमित्यर्थः। प्रत्यासत्तिः सामीप्यम्। तथा च प्रत्यसत्त्या विधावाश्रीयमाणः अल् स्थानिसम्बन्धी गृह्यते।

2.2 निष्कृष्टार्थः

**शेखरे - आदेशस्य स्थानिभूतो योऽल् तत्स्थानिसम्बन्धी च योऽल् तद्वृत्तिधर्माश्रये नेत्यर्थः।**

अनल्विधौ इत्यस्य स्थान्यलाश्रयविधौ कर्तव्ये आदेशः स्थानिवत् न - इत्यर्थः। तत्र स्थान्यल् इति पदे स्थानी अल् स्थान्यल् इति कर्मधारयः स्थानिनः अल् स्थान्यल् इति षष्ठीतत्पुरुषश्च स्वीक्रियते। आदेशस्य स्थानिभूतो यः अल् -इति कर्मधारये। तत्स्थानिसम्बन्धी यः अल् इति तत्पुरुषपक्षे। अत्र अल् इति पदं लक्षणया अल्वृत्तिधर्मपरम्। तथाच - 1. स्थानिनि अलि विद्यमानं धर्ममाश्रित्य प्रवर्तमानो यो विधिः, तस्मिन् कर्तव्ये आदेशः स्थानिवत् न भवति, 2. स्थान्यवयवे अलि विद्यमानं धर्ममाश्रित्य प्रवर्तमानो यो विधिः, तस्मिन् कर्तव्ये आदेशः स्थानिवत् न भवति - इति द्विविधोऽर्थः सिध्यति।

2.3 उदाहरणेषु समन्वयः

**शेखरे - अत एव रेफस्थानिकविसर्गस्य रुशब्दत्वं न स्थानिवत्त्वेनेति भोभगो इत्यत्र भाष्ये स्पष्टम्।**

अत एव - अल्पदम् अल्वृत्तिधर्मे लाक्षणिकमित्यत एव। भोभगोअघोअपूर्वस्य योऽशि इति सूत्रे अश्ग्रहणाभावे वृक्षस्तत्र इत्यादिस्थले दोषो भवतीत्याशङ्क्य अनल्विधाविति निषेधात् दोषो न भविष्यतीति प्रतिपादनावसरे भोभगो इति सूत्रस्य अल्विधित्वमाश्रितं भाष्यकृता। तथाहि - (वृक्ष सु तत्र) इति स्थिते ससजुषो रुः इति सूत्रेण सकारस्य रुत्वे कृते (वृक्ष रु तत्र) इति जाते खरवसानयोर्विसर्जनीयः इति सूत्रेण रेफस्य विसर्गे (वृक्षः तत्र) इति। अत्र विसर्गादेशस्य स्थानिवद्भावेन रुशब्दत्वे, भोभगोअघोअपूर्वस्य योऽशि इति सूत्रे अशीत्यस्याभावे, यत्वं प्राप्नोति। अवर्णपूर्वस्य

रोः यः स्यात् - इति अशीत्यस्याभावे सूत्रार्थः। परन्तु अनल्विधौ इति निषेधात् अत्र स्थानिवद्भाव आश्रयितुं न शक्यते - इत्युक्तं भाष्ये। तथाहि - आदेशस्य विसर्गस्य स्थानिनि अलि रेफे विद्यमानो धर्मः रुशब्दत्वम्। स्थान्यल्वृत्तिधर्माश्रयो विधिः, रुशब्दत्वाश्रयो विधिः, भोभगोअघोअपूर्वस्य यः इति। तथा च भोभगो इति यत्वविधेः अल्विधित्वात् तस्मिन् कर्तव्ये स्थानिवद्भावनिषेधाद् यत्वं न भविष्यतीति तदर्थं सूत्रे अश्ग्रहणमनावश्यकम्। अत्र रुशब्दत्वम् अल्वृत्तिधर्मः। वृक्षः तत्र इत्यत्र विसर्गस्य स्थानी रेफः, न तु रुः, खरवसानयोर्विसर्जनीयः इति सूत्रेण रेफस्य स्थाने विसर्गविधानात्। भोभगो इति विधौ तु रोः यत्वं विधीयते, न तु रेफस्य। यद्यपि विसर्गस्य स्थानी रेफः एव तथापि तत्र रुशब्दत्वाभावे अनल्विधावित्यस्य प्रवृत्तिः न भवति।

## 2.4 विचाराः

**शेखरे - ऋधातोर्द्वित्वे अभ्यासस्योरदत्वे अरित्यस्य हलादिःशेषस्तु अरित्यस्य पुनः पूर्वोभ्यास इत्यनेन अभ्यासत्वात्। तस्यापि द्विरुक्तधातुपूर्वभागत्वात्। प्रक्रियाज्ञानवतां तथा ज्ञानस्य सुलभत्वात्।**

यदि अल्पदं लक्षणया अल्वृत्तिधर्मपरमिति स्वीक्रियते तर्हि आर इत्यादौ दोषः स्यादिति आक्षेपः। तथाहि - ऋधातोः लिटि तस्य प्रथमपुरुषैकवचने णलि (ऋ णल्) इति स्थिते “लिटि धातोरनभ्यासस्य” इति सूत्रेण धातोः द्वित्वे (ऋ ऋ णल्)। उरत् इति सूत्रेण अभ्यासऋकारस्य अकारादेशे, उरण् रपरः इति रपरत्वे (अर् ऋ णल्) इति।

अत्र “हलादिः शेष” इति सूत्रेण रेफस्य लोपः साधनीयः। किन्तु - आदेशः (अर्), तस्य स्थानिभूतः अल् ऋकारः। स्थान्यल्वृत्तिधर्मः - अभ्यासत्वम्।

अल्वृत्तिधर्मम् अभ्यासत्वम् आश्रित्य प्रवर्तमानो विधिः - हलादिः शेष इति। एवञ्च अनल्विधाविति निषेधे सति अर् इत्यस्मिन् अभ्यासत्वाभावे कथं रेफलोपः? - इति।

**उत्तरम्** - ऋ इत्यस्मिन् स्थानिनि या अभ्याससंज्ञा तामाश्रित्य हलादिः शेषः इत्यस्य प्रवृत्तिः मास्तु। अर् ऋ णल् इत्यवस्थायाम् अर् इत्यस्य द्विरुक्तपूर्वभागत्वात् "पूर्वोऽभ्यास" इति सूत्रेण पुनरभ्याससंज्ञा सुलभा। तामाश्रित्य हलादिः शेषः इति प्रवर्तते।

**शेखरे - अत एव धिन्वन्तीत्यादौ इट् न। उकारवृत्त्यार्धधातुकत्वस्य वकारेनतिदेशात्।**

अत एव - अल्पदं लक्षणया अल्वृत्तिधर्मपरमिति स्वीकारादेव। धिवि प्रीणने इति धातोः लटि प्रथमपुरुषबहुवचने रूपं धिन्वन्तीति। इदितो नुम् धातोः इति सूत्रेण नुमागमे धिन्व्। ततो लटि तस्य झिप्रत्ययादेशे "झोऽन्तः" इति सूत्रेण अन्तादेशे च (धिन् व् अन्ति) इति। अत्र "धिन्विकृण्व्योर च" इति सूत्रेण उविकरणः, वकारस्य अकारादेशश्च विधीयते। धिन् अ उ अन्ति। "अतो लोप" इति सूत्रेण अकारलोपे, इको यणचीति उकारस्य वकारादेशे धिन्व् अन्ति।

अत्र आदेशो वकारः, स्थानी उकारः अल्, तद्वृत्तिधर्मः आर्धधातुकत्वम्, अल्वृत्त्यार्धधातुकत्वाश्रयो विधिः आर्धधातुकस्येड् वलादेः इति इडागमविधिः। तस्मिन् कर्तव्ये अनल्विधाविति निषेधात् स्थानिवत्त्वाभावात् वकारादेशे वलादित्वसत्त्वेपि आर्धधातुकत्वाभावात् इडागमो नास्ति।

**शेखरे - यत्तु अत्र इण्निवृत्तये स्वविधावपि स्थानिवत्त्वम् अपरविधाविति न्यासेन साधितं भाष्ये सा त्वेकदेश्युक्तिः। असिद्धवत्सूत्रेण सिद्धस्य आयन्नासन्नित्यादेः तत्फलत्वेनोपन्यासात्।**

epathshala पाठशाला A Gateway to all Post Graduate Courses

**अत्र आक्षेपः** - धिन्वन्ति इत्यत्र इडागमवारणार्थम् अल्पदस्य तद्वृत्तिधर्मपरतया व्याख्यानमनावश्यकम्। अचः परस्मिन्नित्यत्र भाष्ये प्रकारान्तरेण इडागमवारणात्। तथाहि – "अचः परस्मिन् पूर्वविधौ" इति सूत्रस्य स्थाने "अचः परस्मिन्नपरविधौ" इति न्यासान्तरं कर्तव्यम्। तेन पूर्वविधौ स्वविधौ च स्थानिवद्भावः सिध्यति। तथा च धिन्वन्तीत्यत्र परनिमित्तकस्य यणादेशस्य स्वस्य इडागमविधौ कर्तव्ये स्थानिवद्भावेन वलादित्वाभावात् इडागमो न भविष्यति। एवञ्च धिन्वन्तीत्यत्र इडागमवारणाय अल्पदे लक्षणाश्रयणं व्यर्थम् - इति।

**समाधानम्** - अपरविधाविति वक्तव्यमित्यादि भाष्यं न सिद्धान्तिभाष्यं, किन्तु एकदेशिभाष्यम्। असिद्धान्तिना कथितमिति यावत्। कथं ज्ञायते एकदेशिभाष्यमिति। अचः परस्मिन्नपरविधौ इति न्यासान्तरं कर्तव्यमिति वदता तत्प्रयोजनत्वेन (आयन् आसन् धिन्वन्ति कृण्वन्ति दध्यत्र मध्वत्र चक्रतुः चक्रुः) इत्येतानि उपन्यस्तानि। तत्र आयन् आसन् इत्यनयोः सिद्धिः असिद्धवदत्राभात् इत्यनेन असिद्धवद्भावविधानादेव पाणिनिना साधितानि। (इणो यण्, श्नसोरल्लोपः, आडजादीनाम्) इत्येतानि सूत्राणि यतः आभीये निवेशितानि अतः यणल्लोपयोः कृतयोरपि तयोरसिद्धत्वात् अजादित्वप्रयुक्तः आडागमः सिध्यत्येव। असिद्धवदत्राभादित्यनेन तत्सिद्धिप्रकारं यो न जानाति स एव आयन् आसन् इत्यनयोः सिध्यर्थं पूर्वविधाविति पदमपनीय अपरविधाविति वक्तव्यमिति वदेत्। तस्मात्तस्य भाष्यस्य एकदेश्युक्तत्वात् तदाधारेण धिन्वन्तीत्यस्य साधनं न युक्तम्।

**शेखरे - अस्यापि अचः पूर्वत्वविज्ञानादिति वार्तिके पञ्चमीसमासेन सिद्धेः कैयटेनोक्तत्वाच्च।**

अस्यापि - धिन्वन्तीत्यस्यापि। अचः परस्मिन् पूर्वविधाविति यथास्थितन्यासेऽपि पूर्वविधौ इत्यत्र पूर्वस्मात् विधिरिति च पञ्चमीसमासपक्षे (स्थानिनो यः पूर्वः तस्मात् परतया विधौ कर्तव्ये स्थानिवत् स्यात्) इत्यर्थसम्भवात् धिन् उ अन्ति इत्यत्र उकारात् पूर्वं यदङ्गं तस्मात् परतया इडागमविधौ कर्तव्ये परनिमित्तकवकारादेशस्य स्थानिवद्भावे इडागमवारणं सिध्यतीति कैयटेन प्रतिपादितम्। तदपि अपरविधाविति न्यासान्तरकरणपरभाष्यस्य एकदेश्युक्तित्वं स्पष्टयति।

**शेखरे - प्रदीव्येत्यादौ च वलादिलक्षण इट् न।**

न तु स्थान्यलाश्रयविधौ इत्यत्र 1. स्थानिभूतः यः अल्, 2. स्थानिसम्बन्धी यः अल् - इति द्विविधः अर्थः उक्तः। तत्र स्थानिभूतः यः अल् इति कर्मधारयस्वीकारे धिन्वन्तीत्यत्र इडागमवारणं फलमुदाहृतम्। स्थानिसम्बन्धी यः अल् इत्येवं षष्ठीतत्पुरुषस्वीकारे प्रदीव्य इत्यादौ इड्वारणं फलम्। तथाहि - दिवुधातोः समानकर्तृकयोः पूर्वकाले इत्यादिना क्त्वाप्रत्यये क्त्वान्तेन तेन प्र इत्यस्य कुगतिप्रादय इत्यनेन समासे “समासेऽनञ्पूर्वे क्त्वो ल्यप्” इति सूत्रेण ल्यबादेशे प्र दिव् ल्यप्। अत्र स्थानिनि क्त्वाप्रत्यये वलादित्वम् आर्धधातुकत्वञ्चास्ति। आदेशो ल्यप्। तस्य वलादित्वम् आर्धधातुकत्वं च नास्ति। किन्तु आदेशः स्थानिवत् इति वचनेन क्त्वाप्रत्यये विद्यमानं वलादित्वम् आर्धधातुकत्वं च यदि आदेशे ल्यपि अतिदिश्येत तर्हि प्र दिव् ल्यप् इत्यवस्थायाम् इडागमः प्राप्नुयात्। तत्रोच्यते - अनल्विधौ इति। स्थानिभूतक्त्वाप्रत्ययसम्बन्धितकारनिष्ठं वल्त्वमाश्रित्य प्रवर्तमान इडागमविधिः अल्विधिः। अतः स्थानिवद्भावाभावात् वलाद्यार्धधातुकत्वाभावात् इडागमोऽत्र न भविष्यति।

**शेखरे - स्थान्यलित्युक्तेः बभूविव इत्यादौ वलादिलक्षणेट्सिद्धिः। न हि तत्र वलादित्वं स्थानितो लभ्यं, किन्तु स्वाश्रयमेव।**

अल्विधौ स्थानिवद्भावो नास्तीत्युक्तम्। अल्विधिशब्दस्य अलाश्रयविधिः इत्यर्थः। (स च विधौ आश्रीयमाणः अच् स्थानी वा स्थानिसम्बन्धी वा एव ग्राह्यः, न तु आदेशः वा आदेशसम्बन्धी वा) - इति प्रत्यासत्तिन्यायाश्रयणेन स्वीकृतम्। तथा स्वीकारे किं फलम्, आदेशालः ग्रहणे को दोषः -इति जिज्ञासायामाह स्थान्यलित्युक्तेरित्यादि। बभूविव इत्यादौ इडागमसिद्ध्यादि फलम्। तथाहि- भूधातोः कर्तरि लिटि उत्तमपुरुषद्विवचने वसि तस्य व इत्यादेशे भू व। लिटि धातोरनभ्यासस्य इति सूत्रेण धातोः द्वित्वे भू भू व। ह्रस्वः, भवतेरः, अभ्यासे चर्च इत्येवम् अभ्यासकार्येषु ब भू व। अत्र वप्रत्ययस्य स्वतः वलादित्वात् स्थानिवद्भावेन आर्धधातुकत्वाच्च आर्धधातुकस्येड् वलादेः इति सूत्रेण इडागमे बभू इव इति जाते भुवो वुग् लुङ्लिटोः इति सूत्रेण वुगागमे बभूव् इव -बभूविव इति रूपं सिध्यति। अत्र यद्यपि इडागमविधावाश्रीयमाणः वल् स्थानिनि विद्यते तथापि स न प्रकृते आश्रीयते। किन्तु आदेशे विद्यमान एवाश्रीयते। एवञ्च आदेशालाश्रयविधित्वात् अनल्विधाविति निषेधो नात्र प्रवर्तते।

**शेखरे - यन्निमित्तवैकल्यप्रयुक्तोपदेशाप्रवृत्तावतिदेशो मृग्यते तस्य निमित्तस्य स्थान्यलसाधारणधर्मत्वे एव निषेधप्रवृत्तेः। प्रकृते च आर्धधातुकत्ववैकल्यप्रयुक्ता अप्रवृत्तिः, न तत् स्थान्यलसाधारणं, यच्च तादृशवल्त्वघटितं वलादित्वं न तद्वैकल्यप्रयुक्ता अप्राप्तिः।**

बभूविव इत्यत्र वलादित्वमाश्रित्य प्रवर्तमानस्य इडागमविधेः अलाश्रयविधित्वेऽपि स्थान्यलाश्रयविधित्वाभावात् स्थानिवद्भावनिषेधो नास्तीति

प्रदर्शितम्। तदेव विशदयति यन्निमित्तेत्यादिना। शास्त्रस्य प्रवृत्त्यर्थम् अपेक्षितानि निमित्तानि यत्र कात्स्र्येन उपलभ्यन्ते तत्रैव शास्त्रस्य प्रवृत्तिर्भवति। तेषु निमित्तेषु कानिचन निमित्तानि सन्ति कानिचन निमित्तानि न सन्ति चेत् तत्र शास्त्रस्य प्रवृत्तिः न भवति। तदा येषां निमित्तानामभावात् शास्त्रस्य अप्रवृत्तिः तेषां निमित्तानां सम्पादनाय स्थानिवद्भावो नाम उपाय आश्रितः शास्त्रकृता। आदेशे कृते, यस्य निमित्तस्य वैकल्यवशात् शास्त्रं न प्रवर्तते, तत् निमित्तं यदि स्थानिनि विद्यते तर्हि आदेशस्य स्थानिवद्भावे सति तत् शास्त्रं प्रवर्तिष्यते। यदि तत् निमित्तं स्थान्यलसाधारणधर्मः तर्हि स्थानिवद्भावो नास्ति - इति अनल्विधावित्यनेनोच्यते। प्रकृते बभू वस् इति स्थिते वसः स्थाने व इत्यादेशे कृते इडागमशास्त्रं प्रवर्तते वा न वेति विचारः। इडागमशास्त्रप्रवृत्त्यर्थम् प्रत्ययस्य वलादित्वम् आर्धधातुकत्वम् इति निमित्तद्वयम् अपेक्ष्यते। तयोः आर्धधातुकाख्यस्य निमित्तस्य व इत्यस्मिन्नादेशे वैकल्यमस्ति। वलादित्वस्य वैकल्यं नास्ति। तथा च इडागमशास्त्रस्य अप्रवृत्तिः। तदा स्थानिनि स धर्मो विद्यते वा न वेति इति परीक्ष्यते। अस्ति चेत् स्थानिवद्भावेन स आदेशे सम्पादनीयः। यदि स धर्मः स्थानिरूपे वा स्थान्यवयवे वा अलि साधारणतया विद्यमानः, अल्भिन्ने साधारणतया अविद्यमानः धर्मः तर्हि स्थानिवद्भावो नास्ति। प्रकृते आर्धधातुकत्वाख्यो धर्मः अलनल्साधारणः, न तु अल्मात्रसाधारणः, क्त्वाप्रत्यये स्थानिनि वर्तते, न तु तदवयवे कस्मिंश्चिद् वर्णे विद्यते। यच्च तदवयवे तकारे विद्यते वल्त्वं तस्य प्रकृते वैकल्यं नास्ति। तस्मात् स्थानिवद्भावनिषेधो नास्ति।

### 3.0 स्थानिवद्भावसम्बन्धिनः विशेषाः

### 3.1 शास्त्रीयकार्ये एव स्थानिवद्भावः

**शेखरे - प्रत्यासत्त्या च शास्त्रीयकार्ये एव स्थानिवत्त्वम्। तेन नायकसिद्धिः।**

(आदेशः स्थानिवत् स्यात्) - इत्युच्यते। कदा आदेशः स्थानिवत् स्यात् - किमर्थम् आदेशः स्थानिवत् स्यात् - इति तु साक्षात् नोक्तं स्थानिवत्सूत्रे। तथापि अनल्विधावित्यत्र विधिग्रहणात् विधौ कर्तव्ये एव स्थानिवद्भाव आश्रयणीय इति लभ्यते। स च विधिः प्रत्यासत्त्या शास्त्रोक्तो विधिरेव। न तु शास्त्रानुक्तः।

केनचित् शास्त्रेण विहितं कार्यं शास्त्रीयम्। केनचिदपि शास्त्रेणाविहितं कार्यमशास्त्रीयम्। अशास्त्रीयकार्यार्थं स्थानिवद्भावो नाश्रयणीयः। यथा - नायक इत्यत्र। तथाहि - णीञ् प्रापणे इत्यत्र अनुबन्धलोपे णो नः इति नत्वे ततः ण्वुल्तृचौ इति सूत्रेण ण्वुलि अनुबन्धलोपे युवोरनाकौ इति अकादेशे नी अक। अचो ञ्णिति इत्यनेन वृद्धौ नै अक। इदानीम् एचोऽयवायावः इत्यायादेशशास्त्रस्य प्रवृत्त्यर्थमपेक्षितानि सर्वाणि निमित्तानि समवहितानि। तथा च तत्प्रवृत्त्या नायक इति सिध्यति। अत्र आयादेशरूपं कार्यं शास्त्रीयम्। आयादेशाभावरूपं कार्यम् अशास्त्रीयम्। आयादेशो न स्यादित्यर्थकस्य कस्यचिदपि शास्त्रस्याभावात्। अशास्त्रीये कार्येऽपि यदि स्थानिवद्भावः स्यात् तर्हि अत्र आयादेशाभावे कर्तव्ये ऐकारादेशस्य स्थानिवद्भावेन ईकारत्वे, एजभावात् आयादेशो न स्यात्। तथा च नायक इति न सिध्येत्।

### 3.2 शास्त्रातिदेशो वा कार्यातिदेशो वा

**शेखरे - प्राधान्यात् कार्यातिदेशोयम्**

स्थानिवदादेश इति अतिदेशसूत्रं भवति। अतिदेशो नाम आरोपः। स च अतिदेशः शास्त्रस्य वा कार्यस्य वा -इति विचारः। तथाहि- आङुपसर्गयुक्तात् हनधातोः

लिङि, वधादेशे कृते, (आ वध् लिङ्) इति स्थिते स्थान्यवस्थायां प्रवर्तमानम् (आङो यमहनः) इति आत्मनेपदविधायकं शास्त्रम् आदेशावस्थायाम् अतिदिश्यते इति कल्पयितुं शक्यते। आदेशघटितसमुदाये स्थानिघटितसमुदायत्वम् आरोप्य स्थानिघटितसमुदाये यथा शास्त्रं प्रवर्त्यते तथा आदेशघटितसमुदायेऽपि शास्त्रं प्रवर्त्यते इति यावत्। तथा - आ वध् लिङ् इत्यवस्थायां हनभावात् अप्राप्तं स्थानिनो हनो विहितमात्मनेपदाख्यं कार्यम् अतिदिश्यते - इति वा कल्पयितुं युज्यते। यद्यपि अस्मिन्नुदाहरणे उभयथापि नास्ति क्लेशः तथापि सर्वत्र तथा योजयितुं न शक्येत। अतः सर्वलक्ष्यसाधारण्येन शास्त्रातिदेशपक्षो वा कार्यातिदेशपक्षो वा स्वीकार्यः इति जिज्ञासा। तत्रोच्यते - प्राधान्यात् कार्यातिदेशोऽयमिति। शास्त्रातिदेशपक्षस्वीकारेपि कार्यसिद्धिरेव फलं, तदेव प्रधानम्। कार्यसिध्यर्थत्वात् सर्वशास्त्राणाम्। तस्मात् बाधकाभावात् कार्यमतिदिश्यते इति स्वीकार एव युक्तः। किञ्च शास्त्रातिदेशपक्षः सर्वत्र सङ्गमयितुं न शक्यते। तथाहि- रामशब्दात् ङेप्रत्यये ङेर्यः इति सूत्रेण यादेशे राम य इति जाते (सुपि च) इति शास्त्रस्य प्रवृत्तिरावश्यकी। किन्तु तदर्थं यानि निमित्तान्यपेक्षितानि अङ्गस्य अकारान्तत्वं, प्रत्ययस्य यञादित्वं सुप्त्वम् इति तेषु सुप्त्वस्य वैकल्यात् तस्य शास्त्रस्याप्रवृत्तिः सम्भाविता। अत्र शास्त्रातिदेशपक्षो वक्तुं न शक्यते। स्थान्यवस्थायां प्रवर्तमानस्य शास्त्रस्य आदेशावस्थायां निमित्ताभावेऽपि प्रवर्तनं शास्त्रातिदेशो नाम। प्रकृते सुपिचेति शास्त्रस्य स्थान्यवस्थायां यञादित्वविरहात् अप्रवर्तमानस्य कथम् आदेशावस्थायां प्रवर्तनम्। तस्मात् शास्त्रातिदेश इति पक्षः क्वचित् दुर्घटः।

**शेखरे - शास्त्रातिदेशस्तु कार्यातिदेशादभिन्नरूपः। तस्यापि कार्यफलकत्वादिति तृज्वत्सूत्रे कैयटः। भाष्येपि (तत्राङ्गशास्त्रातिदेशात् सिद्धम्, आङ्गं यत् कार्यं तदतिदिश्यते) इत्युक्त्या तयोरभिन्नरूपत्वं सूचितम्।**

यद्यपि शास्त्रातिदेशो वा कार्यातिदेशो वेति विवेचनं कृत्वा प्राधान्यात् कार्यातिदेश इत्युच्यते तथापि वस्तुतः तयोः नातीव भेदः। यत्र शास्त्रातिदेशः सम्भवति तत्र अतिदिष्टेन शास्त्रेण कार्यमेव सम्पाद्यते। तादृशस्थले केवलमुक्तिभेद एव, न तु फले कोपि भेदस्तयोः। तयोः अभिन्नरूपत्वे भाष्यकार एव प्रमाणम्। (स्य-सिच्-सीयुट्-तासिषु भावकर्मणोरुपदेशे अज्झनग्रहदृशां वा चिण्वत् इट् च) इति सूत्रे (आङ्गशास्त्रातिदेशात् सिद्धम्) इति वार्तिकस्य (आङ्गं यत् कार्यं तदतिदिश्यते) इति विवरणं कृतं भाष्यकृता। आङ्गं यत् शास्त्रं तदतिदिश्यते इति कथनम् आङ्गं यत् कार्यं तदतिदिश्यते इति कथनञ्च नातीव भिद्यते इति भाष्यकृतां मतिः।

ePathshala
पाठशाला
A Gateway to all Post Graduate Courses